# अलङ्कारशास्त्रे रसोन्मेषः, रसस्वरूपविचारश्च

• **Dr. A GUNASEELAN**

भारतीयालङ्कारशाश्त्रे आचार्यद्रुहिणादारभ्य पण्डितराजजगन्नाथपर्यन्तं रसनिष्पत्तौ स्वरूपे विकासे च गम्भीरतया विचारो दृश्यते। तत्र सर्वप्रथमं नाट्यशास्त्रप्रणेता भरतमुनिः नाट्यशास्त्रे अथर्ववेदोक्तं रसमनुसृत्य रससिद्धान्तमस्थापयत्, एवञ्च अलङ्कारशास्त्रे रस तत्त्वस्य प्रथमः समुद्भावकः भवति भरतमुनिः। अस्य मते रसं विना किमपि नाट्यं कथमपि प्रवर्तयितुं न शक्यते। [1]रसविदां मते अलङ्कारशास्रस्य मूलतत्त्वं रस एव विद्यते। अतः अलङ्कारशास्त्रे रसोऽवश्यं स्वीकार्य एव।

भरतमुनेः अनन्तरं दृश्यश्रव्योभयविधकाव्यतत्त्वविद्भिः प्रत्यक्षाप्रत्यक्षरूपेण रससिद्धान्तस्य विकासे महत्त्वपूर्णः प्रयासो कृतः। भामह -दण्डि-रुय्यक-कुन्तक-क्षेमेन्द्र-श्रीमदानन्दवर्धनाचार्य-श्रीमदभिनवगुप्ताचार्य-मम्मटाचार्य-पण्डिराजजगन्नाथादयः इत्येते सर्वेऽपि रससिद्धान्तस्य परिष्करणे प्रशंसनीयं प्रयत्नं कृतवन्तः। धनञ्जय – शारदातनय – सिङ्गभूपाल – रामचन्द्र – गुणचन्द्रादयश्च रसविषये प्रशंसनीया एव। भरतमुनेः रससूत्रस्य व्याख्यातारो लोल्लट – शङ्कुक – भट्टनायक – अभिनवगुप्त – महिमभट्टादयश्च रससिद्धान्तस्य प्राधान्यपरिपोषणे महान्तं यत्नमकार्षुः। एतैः नाट्यादिरूपेणलौकिकत्वेऽप्यलौकिकब्रह्मा - नन्दस्वरूपस्य रसस्य महनीयं कमनीयं स्वरूपं प्रतिपादितं वर्तते।

रसस्य शृङ्गारादि भेदो हि सर्वथा प्राचीनो वर्तते। शृङ्गारादिरसानां नामनिर्देशस्तु लौकिकसाहित्ये प्रथमतो भागवता आद्यकविना वाल्कीकिना श्रीमद्रामा यणे बालकाण्डे कृतो विद्यते। पश्चाद् भरतमुनिना स्वीयविरचिते नाट्यशास्त्रे अष्टौ रसाः परिगणिताः। [2] किन्तु केषाञ्चिन्मते नवमः शान्तरसः , वात्सल्यनामको दशमरसः, एकादशो भक्तिरसः तथा अन्येऽपि बहवो रसा पृथक् रूपेण उद्धृताः। तत्र माधुर्यमयप्रेमसमन्वितस्य भक्तिरसस्य संस्थापको भवति भगवद्भक्तिरससंसिक्ततरलहृदयः श्रीगौडीयगोस्वामी।

**रसस्वरूपविचारः** - रससम्प्रदायस्य प्रवर्तकः भवति श्रीभरतमुनिः। विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिरिति भरतमतम्। मम्मटेनाप्येतदेव अनुमतम्। श्रुतिषु ‘रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति’ इति श्रूयते। आनन्दो ह्ययं न लौकिकसुखान्तरसाधारणः। अन्तः - करणवृत्तित्वात् स्वसंवेद्यत्वाच्च। भागवते च तन्महत्त्वं ‘सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम् ’ इति। तत्तद्दर्शनाचार्याः तत्तद्दर्शनानुसारम् अस्य रससूत्रस्य व्याख्यामनकुर्वन्। तत्र केचन नैयायिकाः , केचन वेदान्तिनः , केचन मीमांसकाः, केचनाद्वैतिनः च। तत्र नैयायिकः श्रीशङ्कुको रसानुभूतिरनुमितिजन्येति प्रच्यन्यायानुसारेण प्रत्यपादयत्। अनुमितिवादनाम्ना भरतसूत्रस्य व्याख्याचैतस्य प्रसिद्धा। अयं च नैयायिकः सन् विभावादि साधनेषु रसरूपसाध्येषु च अनुमाप्यानुमापकभावं कल्पयतीति। यथा पर्वते धूमं दृष्ट्वा ‘पर्वतोऽयं वह्निमान् यतो धूमवान् ’ एतत्परामर्शात् पर्वतवह्निस्थिरनुमितिरिति तथैव नटे समादिवत् अनुभावादिकं दृष्ट्वा सामाजिकास्तत्र रसस्थितिमनुमन्वन्ति । एवञ्च रसोऽनुमेयोऽनुमितिगम्यश्चेति श्रीशङ्कुको मनुते। श्रीशङ्कुक एव सर्वप्रथमं लोल्लटस्य उत्पत्तिवादं सहृदयेषु रसानुभवाभावसिद्धान्तं खण्डितवान्। वैदान्तानुसारी भट्टनायकः रसविषये मुक्तिवादस्य परिपोषकश्चासीत्। काव्यादिद्वारा रसनिष्पत्तौ व्यापारत्रयमामनन्ति तत्र प्रथमाभिधा,

---

• **Head and Assistant Professor, Department of Sanskrit, Sourahtra College, Madhurai**

यया शब्दार्थयोज्ञानं भवति। द्वितीयो भावकत्वव्यापारः , येन विभावादयो रत्यादिस्थायिभावाश्च साधारणीकृताः सन्तः परस्य न परस्य मम न मम इत्यादि बन्धमुक्ता उपभोगयोग्याः भवन्ति। जनकतनया रामकान्ता भूत्वा साधारणतया रमणीमात्रव्यपदेशयोग्या भवति। अयमाचार्यो भोगव्यापारं भोजकत्वमिति कथयति। मतमिदं सांख्यमतस्यानुकूलं भवति। एवं च रससूत्रस्थ संयोग इत्यस्य 'भोज्यभोजकभावसम्बन्धात् निष्पत्तिरिति' अस्य मुक्तरित्यर्थः। मीमांसकानुसारी भट्टलोल्लटः रससूत्रस्य सर्वप्रथममेव व्याख्यानमकरोत्। एतेन हि संयोगत् इत्यस्य 'कार्यकारणभावस्वरूपसम्बन्धात्' इत्यर्थः, निष्पत्तिरित्यस्य 'उत्पत्तिरित्यर्थः' व्याख्यातम्। मुख्यतः अयं संयोगादित्यस्य जन्यजनकभावृरूपात् सबन्धादित्यर्थं कृत्वा रसं विभावादीनां कार्यमाहुः। अयमासीन्मीमांसकोऽभिधावादी तथा च समस्तकाव्यार्थस्य साधनमभिधाश क् तिरेवेति स्वीकृतवान्। एतस्य मतमासीत् यच्छब्दस्य प्रत्येकार्थप्रतिपत्तिरभिधयैव तथा भवति यथा एक एव बाण कवचं निर्भिद्य शरीरे प्रविश्य प्रणानपहरतीति। अस्मिन् व्याख्याने अभिनयकुशलतयाआरोपितः स्थायीभावः सामाजिकेषु चमत्कारहेतुः सञ्जायते। नटस्यानुकृतिः सफलतयोत्पन्नः समाजिकमनसि चमत्कारजन्यः आनन्दात्मकरसो निष्पद्यते। मतमिदं सहृदयेभ्यो न रोचते।

रससिद्धान्तं स्थापयन् अभिनवगुप्तस्तु प्रेक्ष्यप्रेक्षकयोः साधारणीभावो भवतीति प्रदर्शयन् भावकत्वबोधकत्वशक्त्यभ्युपगमो व्यर्थ इति च सिद्धान्तयन् रसानुभवे प्रक्रियात्रयं स्वीकरोति-

प्रथमप्रक्रियायाम् -सहृदयः दृश्यदर्शनध्वनियुक्त - श्रव्यश्रवणाननत्रं स्वप्रतिभया कविमनोगतचित्रसदृशं विभावानुभावव्यभिचारिणां देशकालव्यक्तिविशेषसम्बन्धशून्यं चित्रं स्वान्तः करणे चित्रयति। वासनारूपेण स्थितस्य विभावादिसमुचितस्य स्थायीभावस्य जागरणात् तेन सह विभावानुभावव्यभिचारिभावानां पानकरसन्यायेन सम्मिश्रणादभिव्यक्तरसमनुभवति।

द्वितीयप्रक्रियायां – स्थायित्वेन विभावानुभाववर्गे सम्मिश्रितेऽपि स्थाय्येव चर्व्यते। यथा हि अभिनवगुप्तः –

**ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः।**
**पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्ववायम्।।**[3]

इत्यादि वाक्येभ्यो वाक्यार्थप्रतिपत्तेरनन्तरं मानसी साक्षात्कारात्मिकाऽपहसित - तत्तद्वाक्योपात्तकालादिविभागतावत्प्रतीतिरुपजायते। तस्यां च या मृगपोतकादिभीतिः तस्या विशेषरूपत्वाभावात् भीत इति त्रासकस्थापरमार्थिकत्वात् भयमेव देशकालाद्यानालिङ्गितम्। तत एव भीतोऽहं, भीतोऽहं शतृर्वयस्यो मध्यस्थो वा इत्यादि प्रत्ययेभे भ्यो दुःखसुखादिकृतहानादिबुद्ध्युत्तरोदयनियमवत्तया विघ्नबहुलेभ्यो विलक्षणं निर्विघ्नप्रतीतिग्राहयं साक्षादिव हृदये निविशमनं चक्षुषोरिव विपरिवर्तमानं भयानको रसः।[4]

तृतीयप्रक्रियायां - संविदः पूर्णतयान्तर्मु खी भूतत्वात् वि षयतयाऽवभासमानस्योद्बुद्ध्य स्थायिनोऽपि वासनायां निमग्नत्वात् विषयविषयिरूपं द्वैतं सर्वथा विनश्यति।

एवं तृतीयप्रक्रियायामभिनवगुप्तमतानुसारं रसानुभवः परमानन्दानुभवो व्यतिरेकतुरीयातीतसमाधौ अनुभूयमानात् अनुभवाद्भिन्नः , सर्वस्यापि वैषयिकज्ञानस्य वासनायां निमग्नत्वात् शुद्धस्य संविगात्मन

आनन्दरूपे स्वरूपे भावनाच्च।[5] तथा च अभिनवभारत्याम् - अस्मिन्मते तु संवेदनमेवानन्दघनमास्वाद्यते। तत्र का दुःखशङ्का।[6]

एवञ्च अभिनवगुप्तप्रतिपादितरसब्रह्मवादानुसारं रसास्वादो चरमावस्थायां न ब्रह्मास्वादसहोदरो भट्टनायकमते यथा। पण्डितराजजगन्नाथमतस्थ रत्याद्यवच्छिन्नाया भग्नावरणायाश्चित्तोऽनुभावं नास्ति नापि सः भग्नवरणचिद्विशिष्टस्य रत्यादेरनुभवः। निरवच्छिन्नपरमान्दास्वादरसास्वादो विद्यते।

रसशास्त्रानुसारेण रस्यन्ते आस्वाद्यन्ते इति रीत्या शृङ्गारवीरकरुणाद्भुत- हास्यभयानकबीभत्स-रौद्राख्याः रसाः स्वीक्रयन्ते। केषाञ्चिन्मते निर्वेदः शमो वा स्थायिभावो यस्य तादृशः शान्तरसः वात्साल्यस्थायी वात्सल्यरसः तथा भगवद्गतिस्थायी भक्तिरसोऽपि स्वीक्रियते। एवञ्च रसज्ञानां मतेऽष्टभेदो दशभेद एकादशभेदो वा विद्यते।

**टिप्पणी**

1. न हि रसाद् ...। नाट्याशास्त्रम् – पृ – 71.
2. नाट्याशास्त्रम् – 6-26.
3. अभिज्ञानशाकुन्तलम् – 1-7.
4. भक्तिरसविमर्शः – पृ – 200.
5. भक्तिरसविमर्शः – पृ – 200.
6. भक्तिरसविमर्शः – पृ – 201.

**उपयुक्तग्रन्थसूची** -

1. अभिज्ञानशाकुन्तलम्– कालिदासः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी – 1996.
2. नाट्यशास्त्रम्– भरतः, भारतीयविद्याप्रकाशन्, दिल्ली – 2003.
3. भक्तिरसवीमर्शः– कपिलदेवब्रह्मचारी, भारतीयविद्याप्रकाशन् - वाराणसी – 1989.

❖